# Sutaproktam Vasudeva Stotram

# सूतप्रोक्तं वासुदेवस्तोत्रम्

## Document Information

Text title : Sutaproktam Vasudeva Stotram

File name : sUtaproktaMvAsudevastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Adiparva | adhyAya 1/193-197||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# सूतप्रोक्तं वासुदेवस्तोत्रम्

भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥ १९३॥

शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥ १९४॥

असत्सत्सदसच्चैव यस्माद्देवात्प्रवर्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्म मृत्युः पुनर्भवः ॥ १९५॥

अध्यात्मं श्रूयते यच्च पञ्चभूतगुणात्मकम् ।
अव्यक्तादि परं यच्च स एव परिगीयते ॥ १९६॥

यत्तद्यतिवरा युक्ता ध्यानयोगबलान्विताः ।
प्रतिबिम्बमिवादर्शे पश्यन्त्यात्मन्यवस्थितम् ॥ १९७॥

श्रद्दधानः सदोद्युक्तः सत्यधर्मपरायणः ।
आसेवन्निममध्यायं नरः पापात्प्रमुच्यते ॥ १९८॥

इति महाभारते आदिपर्वणि १ अध्यायान्तर्गतं
सूतप्रोक्तं वासुदेवस्तोत्रं सम्पूर्णम् ।

महाभारत । आदिपर्व । अध्याय १/१९३-१९८॥

mahAbhArata . Adiparva . adhyAya 1/193-198..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*